तयोर्व्यासस्त्रूत्रयोर्यः संपातस्तस्मादुपरितनं खण्डं द्युज्या । सोऽत्तरगोलेऽधःस्थया कुज्यया युता यावत् क्रियते ताव-द्दिनार्धेऽर्कोदयास्तसूत्रयोरन्तरं स्यात् । दक्षिणे तु कुज्यया हीना । यतस्तत्रोदयास्तसूत्रादधः कुज्या । यदर्को-दयास्तसूत्रयोरन्तरं सा च हृतिरुच्यते । एवमन्त्यापि । अत्राहोरात्रवृत्तव्यासार्धं त्रिज्यातुल्यैरङ्कैरङ्क्यते तावत् त्रिज्यातुल्यं भवति । तैरङ्कैर्यावत् कुज्या गण्यते तावच्चरज्यातुल्या भवति । अथ चरज्यया त्रिज्या युतो-नाऽन्त्यासंज्ञा भवति । नह्यन्त्याहृत्योः क्षेत्रसंस्थानभेदः । किन्त्वङ्कानां गुरुलघुत्वात् केवलं सङ्ख्याकृतो भेद इत्युप-पन्नम्" प्रमिता० ।

**अन्त्यकर्म्मन्** न० अन्ते नाशे भवं कर्म्म । अन्त्येष्टिक्रियायाम् । "जायायै पूर्व्वमारिण्यै दत्त्वाग्नीनन्त्यकर्मणि" "व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च अभिचारमहीनञ्च त्रिभिः कृच्छ्रैर्व्यपोहति" इति "जातकर्म्मान्त्यकर्माणि नवश्राद्धं तथैव चेति" च मनुः । "तमेनं मृतमितोऽस्मादृग्यामात् अग्नये" इति छा०उप० अग्नयेऽग्न्यर्थमृत्विजोहरन्ति पुत्त्रा वान्त्यकर्म्मणि" इति छा०उप० भा० ।

**अन्त्यज** पु०स्त्री० अन्त्यः सन् जायते जन–ड । शूद्रे तस्य वर्णमध्ये शेषभवत्वात्तथात्वम् । "येन केनचिदङ्गेन हिंस्याच्चे-च्छ्रेष्ठमन्त्यज"इति मनुः । "अन्त्यजः शूद्रः"इति कुल्लू० । शेषजातमात्रे त्रि० । अन्त्यश्चाण्डाल इव जायते जन–ड । रजकादिषु सप्तसु जातिषु पु०स्त्री० "रजकश्चर्मकारश्च नटो वरुड़ च । कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः" अत्रिसंहिता । "न शूद्रराज्ये निवसेदित्यधिकृत्य नोपसृष्टेऽन्त्यजैर्न्नृभिरिति" "सहस्रं त्वन्त्यजस्त्रियामिति" च मनुः ।

**अन्त्यजन्मन्** पु०स्त्री० अन्त्यं जन्म यस्य । शूद्रे, "प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मन"इति मनुः । शेषजातमात्रे त्रि० ।

**अन्त्यजाति** पु०स्त्री० अन्त्या जातिर्यस्य । शूद्रे । "शरीरजैः कर्मदोषैर्याति स्थावरतां नरः । वाचिकैः पक्षिमृगतां मानसैरन्त्यजातितामिति" मनुः । चण्डालादौ च । "अन्त्यजातिरविज्ञातो निवेशस्यास्य वेश्मनीति" आप० ।

**अन्त्यभ** न० कर्म० । मीनराशौ, रेवतीनक्षत्रे च तयोः राशि चक्रस्यान्ते स्थितत्वात्तथात्वम् ।

**अन्त्ययोनि** पु०स्त्री० अन्त्या योनिरुत्पत्तिर्यस्य । शूद्रे, चण्डालादौ च "शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्य-योनय" इति मनुः ।

**अन्त्यवर्ण** पु०स्त्री० कर्म्म० । शूद्रे । पदवाक्यादेरवसानस्थिता-क्षरे पु० । [पृष्ठेऽस्य विवरणम् ।

**अन्त्यानुप्रास** पु० कर्म० । शब्दालङ्काररूपे अनुप्रासभेदे (१७८)

**अन्त्यावसायिन्** पु० स्त्री० "निषादस्त्री तु चण्डालात् पुत्त्र-मन्त्यावसायिनम् । श्मशानगोचरं सूते" इति मनूक्ते निषादस्त्रियां चण्डालजाते (मुरदाफरास) इति ख्याते सङ्कीर्णवर्णे स्त्रियां ङीप् । "चण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा । मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः" इत्यङ्गिरसोक्तचाण्डादिषु च । "अन्त्यावसायिनामन्न-मश्नीयाद्यस्तु कामत" इति अङ्गिरःस्मृतिः ।

**अन्त्याश्रम** पुंन० कर्म्म० । चतुर्थाश्रमे भिक्षुरूपशेषाश्रमे ।

**अन्त्याश्रमिन्** पु० अन्त्याश्रमोऽस्त्यस्य इनि । चतुर्थाश्रमयुक्ते ।

**अन्त्याहुति** स्त्री कर्म्म० । अन्त्येष्टौ साग्निकस्य मृतस्य देहसंस्कारके यज्ञभेदे "अन्त्याहुतिं हावयितुं सविप्रा" इति भट्टिः ।

**अन्त्यूति** स्त्री अन्ति अन्तिकस्य वा ऊतिः रक्षणम् अव–क्तिप् कलोपः । आसन्नरक्षणे "अहमन्त्यूतिमयोभुवमिति" ऋ० १,१२८,१ ।

**अन्त्येष्टि** स्त्री अन्ते भवा इष्टिः । साग्निकस्य मृतस्य देह-संस्कारार्थमिष्टिभेदे तत्समत्वात् निरग्नेर्दाहमात्रसंस्कारे च । "पतितानां न दाहःस्यात् नान्त्येष्टिर्नास्थिसञ्चय" इति शु०त० स्मृतिः ।

**अन्त्र** न० अन्त्यते देहो बध्यतेऽनेन अति–बन्धने करणे ष्ट्रन् । देहबन्धने–"उक्ताः सार्द्धास्त्रयो व्यामाः पुंसामन्त्राणि सूरिभिः अर्द्धव्यामेन हीनानि स्त्रीणामन्त्राणि निर्द्दिशेत्" । इति वैद्यकोक्तपरिमाणवति नाड़ीभेदे । "सार्द्धत्रिव्यामान्य-न्त्राणि पुंसः स्त्रीणामर्द्धव्यामहीनानि" सुश्रुतम् । "निव्य-दन्त्रविभूषितमिति दुर्गाध्यानम्" "यस्यान्त्रमन्नैरुपले-पिभिरिति" सुश्रुतम् ।

**अन्त्रकूज** पु० अन्त्रस्य कूजः शब्दभेदः । अन्त्रविकूजने "पक्वा-शयस्थोऽन्त्रकूजं शूलं नाभौ करोति वेति" सुश्रुतम् ।

**अन्त्रपाचक** अन्त्रस्थं दोषं पाचयति । त्वक्सारे निर्य्यास-विषे औषधिभेदे "स्थावरञ्जङ्गमञ्चैव द्विविधं विषमुच्यते" इत्युपक्रम्य । "दशाधिष्ठानमाद्यन्तु द्वितीयं षोड़शाश्रयमि-त्यभिधाय "मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सार एव च निर्य्यासाः धातवश्चैव कन्दश्च दशमः स्मृत" इति विशेषतः स्थावरस्य स्थानमुक्त्वा "अन्त्रपाचककर्त्तरीयसौरीयककर-घाटक रम्भनन्दनवराटकानि सप्त त्वक्सारनिर्य्यासविषाणा-